इति कुमारसम्भवे। आसक्तिः। अनुरागः। अभिलाषः। "बलीयान् खलु मेऽभिनिवेशः"। इति शाकुन्तले।)

अभिनिष्टानः, पुं, (अभि+नि+स्तन्+घञ्, अभिनिसः स्तनः शब्दसंज्ञायां इति षत्वं।) विसर्गः। अक्षरं। इति मेदिनी॥

अभिनीतः, त्रि, (अभि+नी+क्तः।) युक्तः। न्याय्यः। अतिसंस्कृतः। प्रशस्तो भूषितो वा। अमर्षी। क्रोधनः अक्षमावान् वा। इत्यमरः॥ ("अस्मिन्नेव प्रकरणे धनञ्जयमुदारधीः।
अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः"।
इति महाभारते। विज्ञः। धीरः।
"स भवान् वित्तसम्पन्नः स्थितः पथि निरत्यये।
मित्रार्थमभिनीतत्वं यथावत् कर्त्तुमर्हसि"।
इति रामायणे।)

अभिनेता, [ऋ] त्रि, (अभि+नी+कर्त्तरि तृच्।) अभिनयकर्त्ता। केचो संखोयाला इत्यादि भाषा। इति नाटकप्रसिद्धं॥

अभिपन्नः, त्रि, (अभि+पद्+कर्त्तरि क्तः।) अपराद्धः। अपराधवान्। आपद्गतः। प्राप्तविपत्तिः। अभिग्रस्तः। शत्रुणाक्रान्तः। इत्यमरः॥ (स्वीकृतः। अङ्गीकृतः। अभिभूतः। पीड़ितः।
"दाहप्रपाकौ शिशिराभिनन्दाः।
पित्ताभिपन्ने नयने भवन्ति"।
"दृष्टिर्दोषाभिपन्ना"। इति सुश्रुते।)

अभिप्रायः, पुं, (अभि+प्र+इन्+भावे अच्।) इच्छाविशेषः। तत्पर्य्यायः। आशयः २ छन्दः ३। इत्यमरः॥ आकूतं ४ भावः ५। इति जटाधरः। (अभिसन्धिः। हृद्गतो भावः।
"दुर्य्योधन ममाप्येतत् हृदि संपरिवर्त्तते।
अभिप्रायस्य पापत्वात् नैवं तु विवृणोम्यहं"।
इति महाभारते। [इति मनुः।)
"तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्"।

अभिप्रेतं, त्रि, (अभि+प्र+इन्+क्तः।) अभिप्रायविषयीभूतं। अभीष्टं। यथा,—
"कामाय तु हितं काम्यमभिप्रेतार्थसिद्धये।
पार्व्वणेन विधानेन तदप्युक्तं खगाधिप"॥
इति भविष्यपुराणं॥ (वाञ्छितः। सम्मतः।)

अभिभवः, पुं, (अभि+भू+भावे अप्।) गर्व्वनाशः। परिभवः। पराभवः। इति शब्दरत्नावली हेमचन्द्रश्च॥ (पराजयः। तिरस्कारः।
"रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः"।
इति रघुवंशे।
"बलवानपि निस्तेजाः कस्य नाभिभवास्पदं"।
इति हितोपदेशे।)

अभिभूतः, त्रि, (अभि+भू+क्तः।) ज्ञानरहितः। तत्पर्य्यायः। इतिकर्त्तव्यतामूढ़ः २ विहस्तः ३ व्याकुलः ४ अभिमायः ५ विक्लवः ६ विह्वलः ७। इति जटाधरः॥ पराभूतः। भग्नदर्पः। तत्पर्य्यायः। आत्तगर्व्वः २। इति जटाधरः॥ आत्तगन्धः ३। इत्यमरः॥ अभिहतः ४। इति तट्टीका॥

("दैत्याभिभूतस्य युवामवोढ़ं
मग्नस्य दोर्भिर्भुवनस्य भारम्"।
इति भट्टिः।)

अभिभूतिः, स्त्री, (अभि+भू+भावे क्तिन्।) अनादरः। अवज्ञा। इति शब्दरत्नावली। (पराभवः। पराजयः। मानभङ्गः। निकारः।
"अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः"।
इति भारविः।)

अभिमतं, त्रि, (अभि+मन्+कर्म्मणि क्तः।) इष्टं। सम्मतं। यथा,—
"अभिमतफलशंसी चारु पुस्फोर बाहु-
स्तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः"।
इति भट्टिः॥ (हृद्यः। प्रियः। हृदयङ्गमः।
"स माधवेनाभिमतेन सख्या
रत्या च साशङ्कमनुप्रयातः"।
इति कुमारसम्भवे।
"अनिशमपि मकरकेतुर्मनसो-
रुजमावहन्नभिमतो मे"॥
इति शाकुन्तले।)

अभिमन्त्रणं, क्ली, (अभि+मन्त्र+करणे ल्युट्।) आह्वानं। आकारणं। इति हेमचन्द्रः॥ डाकन् इति भाषा। (मन्त्रपाठेन संस्कारकरणं। यथा,—
"दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम्"।
इति याज्ञवल्क्यः।)

अभिमन्थः, पुं, (अभि मथ्यते चक्षुः पीड्यतेऽनेन, अभि+मन्थ+करणे घञ्।) चक्षूरोगः। इति त्रिकाण्डशेषः॥ अधिमन्थ इति वैद्यके पाठः। तस्य निदानसम्प्राप्तिरूपाणि।
"वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावतां।
तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः॥
उत्पाट्यत इवात्यर्थं नेत्रं निर्म्मथ्यते तथा।
शिरसोऽर्द्धञ्च तं विद्यादधिमन्थं स्वलक्षणैः"॥
स तु चतुर्विधः। यथा। "हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधिमन्थो रक्तजः पञ्चरात्रात्। षड्रात्राद्वै वातिकः संनिहन्यान्मिथ्याचारात् पैत्तिकः सद्य एव"॥ इति माधवकरः॥

अभिमन्युः, पुं, (अभिमन्यते युद्धार्थं, अभि+मन्+युच्, निपातनात् अनादेशाभावः।) अर्ज्जुनपुत्त्रः। स तु सुभद्रागर्भजातः। इति महाभारतं॥

अभिमरः, पुं, (अभिम्रियतेऽस्मात्, अभि+मृ+अप्) युद्धं। बधः। स्वसैन्यभय। इति विश्वमेदिन्यौ॥ बन्धनं। इति जटाधरः॥ (संहारः। समरः। अवरोधः। स्वपक्षाद्भयं। सङ्केतस्थलनिर्गमः। प्राणनिरपेक्षो यो द्रव्य हेतोः व्याड़ं हस्तिनं वा योधयति सः अभिमरः इत्येके।)

अभिमर्द्दः, पुं, (अभि+मृद्+भावे घञ्।) अवमर्द्दः। पीड़नं। सम्परायः। युद्धं। इति मेदिनी॥ (शत्रुकृतपीड़नं। विपक्षराजस्य उच्छेदसाधनं। "कृतोऽभिमर्द्दः कुरुभिः प्रसह्य"। इति महाभारते।)

अभिमातिः, पुं, (अभि+मा+कर्त्तरि क्तिच्।) शत्रुः। इति हेमचन्द्रः॥

अभिमानः, पुं, (अभि+मन्+भावे घञ्।) अर्थादिना दर्पः। तत्पर्य्यायः। अहङ्कारः २ गर्व्वः ३ ज्ञानं ४ बोधः ५ प्रणयः ६ प्रेमप्रार्थना ७ हिंसा ८ हननं ९। इत्यमरभरतौ॥ स्मयः १० अवलेपः ११ दर्पः १२ अवष्टम्भः १३ टङ्कः १४। इति जटाधरः॥ अपि च।
"गर्व्वो मदोऽभिमानः स्यादहङ्कारस्त्वहङ्कृतिः।
स्यादुद्धतमनस्कत्वे मानश्चित्तसमुन्नतिः।
अहङ्कारस्य पर्य्याय इति केचित् प्रचक्षते"॥
इति शब्दरत्नावली॥

अभिमानितं, क्ली, (अभिमानः जातोऽस्य, अभिमानः+इतच्। अभिमान्यतेऽत्र, अभि+मन्+णिच्+आधारे क्तः।) सुरतं। मैथुनं। इति त्रिकाण्डशेषः॥ अभिमानयुक्ते त्रि॥ (गर्व्वः। मदः। दर्पः।)

अभिमानी, [न्] त्रि, (अभिमन्यते, अभि+मन्+णिनि।) अभिमानयुक्तः। अभिमानग्रस्तः। यथा,—
"कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपितः सोऽभिमानी"। इति वेणीसंहारः॥

अभिमायः, त्रि, (मायामविद्यामधिगतः, प्रादिसमासः।) इतिकर्त्तव्यतामूढ़ः। अभिभूतः। इति जटाधरः॥

अभिमुखं, त्रि, (अभिगतो मुखं। अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति समासः।) सम्मुखं। इति जटाधरः॥

अभियातिः, पुं, (युद्धार्थमभिमुखं यातिः गमनं, अभि+या क्तिच्।) शत्रुः। इति हेमचन्द्रः॥

अभियाती, [न्] पुं, (युद्धार्थमभियानं गमनं, अभि+या+भावे क्तः; इनि।) शत्रुः। इत्यमरटीकायां रायमुकुटः॥

अभियुक्तः, त्रि, (अभि+युज्+क्तः।) तत्परः। परकर्टकरुद्धः। इति मेदिनी॥
("उद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः"।
इति उत्तरचरिते।
"अभियुक्तो यदा पश्येत् न किञ्चिद्धितमात्मनः।
युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह"।
इति हितोपदेशे।) स्मृतिशास्त्रमते अभियोगविषयीभूतः। आसामी इति ख्यातः। तत्पर्य्यायः। प्रत्यर्थी २ प्रतिवादी ३। यथा,—
"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवं।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः"॥
इति व्यवहारतत्त्वे नारदः॥

अभियोक्ता, [ऋ] त्रि, (अभि+युज्+कर्त्तरि तृच्।) अभियोगकर्त्ता। विवादकर्त्ता। फरियादी इति ख्यातः। तत्पर्य्यायः। वादी २ अर्थी ३। यथा,—
"अभियोक्ता प्रगल्भत्वात् वक्तुं नोत्सहते यदि।
तदा कालः प्रदातव्यः कार्य्यशक्त्यनुरूपतः"॥
इति व्यवहारतत्त्वे नारदः॥

अभियोगः, पुं, (अभि+युज्+भावे घञ्।) अप-